[१०१] प्रादिभ्यो [1]धातुजस्योत्तरपदस्य लोपश्च वा बहुव्रीहिर्वक्तव्यः। (म.भा. १.४२४)

प्रपतितं पर्णमस्य प्रपर्णः, प्रपतितपर्णः। प्रपतितं पलाशमस्य प्रपलाशः, प्रपतितपलाशः।

[१०२] नञोऽस्त्यर्थानां बहुव्रीहिर्वा [2]चोत्तरपदलोपश्च [3]वक्तव्यः। (म.भा. १.४२४)

[4]अविद्यमानः पुत्रो यस्य अपुत्रः, अविद्यमानपुत्रः। [5]अभार्यः, अविद्यमानभार्यः।

[१०३] [6]सुबधिकारेऽस्तिक्षीरादीनां बहुव्रीहिर्वक्तव्यः। (म.भा. १.४२४)

अस्तिक्षीरा ब्राह्मणी। अस्त्यादयो निपाताः॥

## सङ्ख्ययाऽव्ययासन्नादूराधिकसङ्ख्याः सङ्ख्येये। (२५/८४३)

सङ्ख्येये या सङ्ख्या वर्तते तया सह अव्ययासन्नादूराधिकसङ्ख्याः[7] समस्यन्ते बहुव्रीहिश्च समासो भवति। अव्यय – उपदशाः। उपविंशाः[8]। आसन्नदशाः। आसन्नविंशाः[9]। अदूरदशाः। अदूरविंशाः[10]। अधिकदशाः। अधिकविंशाः[11]। सङ्ख्या – द्वित्राः। त्रिचतुराः। द्विदशाः[12]। सङ्ख्यया इति किम्? पञ्च ब्राह्मणाः। [13]अव्ययासन्नादूराधिकसङ्ख्याः इति किम्? ब्राह्मणाः पञ्च। सङ्ख्येये इति किम्? अधिका विंशतिर्गवाम्॥

## दिङ्नामान्यन्तराले। (२६/८४५)

दिशां नामानि [14]दिङ्नामानि। दिङ्नामानि सुबन्तानि अन्तराले वाच्ये समस्यन्ते, बहुव्रीहिश्च समासो भवति। दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं [15]दक्षिणपूर्वा दिक्। पूर्वोत्तरा। उत्तरपश्चिमा। पश्चिमदक्षिणा।

[१०४] सर्वनाम्नो वृत्तिमात्रे [16]पुंवद्भावः। (म. भा. १.४२९)

नामग्रहणं रूढ्यर्थम्। इह मा भूत्, ऐन्द्र्याश्च कौबेर्याश्च दिशोर्यदन्तरालम् [17]इति॥

## तत्र तेनेदमिति सरूपे। (२७/८४६)

तत्र इति सप्तम्यन्तं गृह्यते। तेन इति तृतीयान्तम्। [18]सरूपग्रहणं प्रत्येकमभिसम्बध्यते। तत्र इति [19]सप्तम्यन्ते सरूपे पदे तेनेति [20]च तृतीयान्ते इदमित्येतस्मिन्नर्थे समस्येते[21], बहुव्रीहिश्च समासो भवति। [22]इतिकरणश्चेह [23]विवक्षार्थो लौकिकमर्थमनुसारयति। [24]ततो ग्रहणं, प्रहरणं, कर्मव्यतीहारो, युद्धं च समासार्थः [25]इति

---

1. धातुजस्य वाच्यो वा उत्तरपदलोपश्च ड. इ. 2. उत्तरपदलोपः नास्ति ब. 3. वक्तव्यः नास्ति ह. 4. अविद्यमान – अभार्यः नास्ति ब. 5. अविद्यमाना भार्या यस्य इत्यधिकम् क. ड. 6. सुबन्ताधिकारे अस्तिक्षीरादिवचनं क.ड.इ.ह. 7. इत्येते इत्यधिकम् क. 8. उपत्रिंशाः इत्यधिकम् क.ड.इ.फ. 9. आसन्नत्रिंशाः इत्यधिकम् क.ड.इ.फ. 10. अदूरत्रिंशाः इत्यधिकम् क.ड.इ.फ. 11. अधिकत्रिंशाः इत्यधिकम् क. ड. इ. फ. 12. त्रिदशाः इत्यधिकम् क.फ. 13. अव्यया–पञ्च नास्ति फ. 14. दिङ्नामानि नास्ति ब.क.इ.फ. 15. तत् इत्यधिकम् ड. 16. पुंवद्भावनामग्रहणं ब. 17. तद् इत्यधिकम् ड. 18. वाक्यमिदं नास्ति ब. 19. सरूपेण तेन फ, सप्तम्यन्तसरूपे इ. 20. च नास्ति क, तृतीयान्ते नास्ति ड. 21. इति इत्यधिकम् ह. 22. इतिकरणस्ततश्च सिद्धम् फ, इतिकरणश्चेद् ड, तदर्थे च ह. 23. विवक्षा क. 24. तत्र इ. 25. सर्वे इतिकरणाल्लभ्यन्ते ब, इति सर्वं लभ्यते क.ड.इ.फ ह.